# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः
## কুমাৰ ভাস্কৰ বৰ্মা সংস্কৃত আৰু পুৰাতন অধ্যয়ন বিশ্ববিদ্যালয়
## Kumar Bhaskar Varma Sanskrit & Ancient Studies University

ACCREDITED WITH GRADE B+ NAAC

**प्रतिवेदनम्**

**एकदिवसीयव्याख्यानकार्यक्रमः**

# वर्णोच्चारणप्रक्रिया

दिनाङ्कः - 10-05-2024

**आयोजकः** — **व्याकरणविभागः**

**सहयोगविभागः** — **न्यायविभागः**

## *One day Lecture Programme on*
# *Varnochcharanaprakriya*



**संयोजकौ**

डॉ. चिरञ्जीवीअधिकारी

डॉ. राजीवलोचनशर्मा

**स्थानम् - सभागारः, कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयः, नलबारी**




अक्षयतृतीयेति पुण्यतिथौ तदनुसारं 10.05.2024 दिनाङ्के व्याकरणविभागेन न्यायविभागस्य सहयोगितायां **"वर्णोच्चारणप्रक्रिया"** इति विषयमङ्गीकृत्य एकदिवसीयं व्याख्यानं समायोजितम्। कार्यकर्मस्यारम्भो मञ्चासीनैरतिथिभिः दीपं प्रज्ज्वाल्य विहितः। तदनन्तरं व्याकरणविभीगच्छात्रेण वैदिकं मङ्गलमाचरितम्। उद्घाटनभाषणे विश्वविद्यालयस्य कुलपतयः **आचार्याः प्रह्लाद रा. जोशि**वर्याः उच्चारणदोषमधीकृत्य आयोजितस्य व्याख्यानस्यास्य साम्प्रतिके काले प्रासङ्गिकत्वं प्रतिपादितवन्तः। तदनु समागतानाम् अतिथीनाम् समेषां वाक्कुसुमैः स्वागतमकरोत् व्याकरणविभागस्याध्यक्षः अथ च आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य निदेशकश्च **डॉ. चिरञ्जीवी अधिकारी**महोदयः। अवसरेऽस्मिन् विश्वविद्यालस्य कुलसचिवैः **डॉ.विकाशभार्गवशर्म**महोदयैः, परीक्षानियन्त्रकैः **डॉ. रणजीतकुमारतिवारि**महोदयैरपि व्याख्यानस्यास्य प्रासङ्गिकत्वं प्रतिपादितम्। कार्यक्रमे व्याख्यानं प्राददुः काशीहिन्दूविश्वविद्यालयस्य व्याकरणविभागस्य पूर्वविभागाध्यक्षा **आचार्यभगवतशरणशुक्ल**महोदयाः। स्वस्य व्याख्याने शुक्लमहोदयैः वर्णोच्चारणे सम्भाविताः त्रुटयो विशद्रूपेण बोधिताः। व्याख्याने छात्राणां जिज्ञासामपि शमनमकुर्वन् शुक्लवर्याः। कार्यक्रमस्य सुसञ्चालनं धन्यवादज्ञापनञ्चाकरोत् न्यायविभागस्याध्यक्षः **डॉ. राजीवलोचनशर्म**महोदयः। कार्यक्रमेऽस्मिन् संस्कृतसाहित्यविभागीयाः, संस्कृतवेदाध्ययनविभागीयाः,सर्वदर्शनविभागीयाः, न्यायविभागीयाः, राजनीतिविज्ञानविभागीया, असमीयाविभागीयाश्च आचार्याः समुपस्थिताः आसन्। कार्यक्रमे शताधिकाः छात्राः भागं गृहीतवन्तः।

## कार्यक्रमस्य चित्राणि











# एकदिवसीयव्याख्यानकार्यक्रमः, 10-05-2024









# कुमार भास्कर वर्म संस्कृत एवं पुरातन अध्ययन विश्वविद्यालय, नलबाडी में एकदिवसीय व्याख्यान कार्यक्रम का आयोजन

**प्रे.सं.नलबाड़ी १० मई :**अक्षय तृतीया के पवित्र दिनतदनुसार, १०.०५.२०२४ कोन्यायविभाग के सहयोग सेव्याकरण विभाग, कुमार भास्कर वर्म संस्कृत एवं पुरातन अध्ययन विश्वविद्यालय, नलबाडी, असम ने 'वर्णोच्चरण प्रक्रिया' विषय पर एकदिवसीय व्याख्यान का आयोजन किया। विशिष्ट वक्ता के रूप में समाहूत काशी हिंदू विश्वविद्यालय के व्याकरण विभाग के पूर्व विभागाध्यक्ष आचार्य भगवत शरण शुक्ल ने अपने व्याख्यान में वर्णमाला के उच्चारण में होने वाली संभावित त्रुटियों के बारे में विस्तार से बताया। श्री शुक्ल ने व्याख्यान में विद्यार्थियों की जिज्ञासा भी शांत की। दीप प्रज्जवलित कर वैदिक मंगलाचरण के साथ कार्यक्रम प्रारंभ किया गया। इसके अनन्तरअपने उद्घाटन भाषण मेंविश्वविद्यालय के कुलपतिआचार्य प्रह्लाद आर. जोशी महोदय ने हाल के दिनों में उच्चारण संबंधी त्रुटियों पर आयोजित इस व्याख्यान की प्रशंसा की। व्याकरण विभाग के अध्यक्ष एवं आंतरिक गुणवत्ता आश्वासन केंद्र के निदेशक डॉ. चिरंजीवी अधिकारी ने सभी अतिथियों का वाचिक स्वागत किया। इस अवसर पर विश्वविद्यालय के कुलसचिव(प्रभारी)डॉ. श्री विकाश भार्गव शर्मा, परीक्षा नियंत्रक(प्रभारी) डॉ. रणजीत कुमार तिवारी ने भी व्याख्यान की प्रासंगिकता पर बल दिया। कार्यक्रम का संचालन और धन्यवाद ज्ञापन न्याय विभाग के अध्यक्ष डॉ. राजीव लोचन शर्मा ने किया। व्याख्यान में संस्कृत साहित्य विभाग, संस्कृत वेदाध्ययन विभाग, सर्वदर्शन विभाग, न्याय विभाग, राजनीति विज्ञान विभाग और असमिया विभाग के प्राध्यापक उपस्थित रहे। कार्यक्रम में १०० से अधिक विद्यार्थियों ने भाग लिया



**ग्रस्य वृत्तान्तः दैनिकं संस्कृतवार्तापत्रम् (सूरतम्)**

वारः मंगलवासरः

दिनाङ्क : 14 मई 2024

## कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये

# 'वर्णोच्चारणप्रक्रिया' इति विषयमङ्गीकृत्य एकदिवसीयं व्याख्यानम्





**वार्ताहरः श्रीनिशिकान्तपाण्डेयः**

नलबाडी, असमप्रदेशः। कुमारभास्कर-वर्म-संस्कृतपुरातनाध्ययनविश्व-विद्यालये व्याख्यान-कार्यक्रमः समायोजितः अक्षयतृतीयेति पुण्यतिथौ तदनुसारं 10.05.2024 दिनाङ्के असमप्रदेशस्य नलबारी-स्थित-कुमार-भास्कर-वर्म-संस्कृतपुरातना-ध्ययन-विश्वविद्यालयस्य व्याकरणविभागेन न्यायविभागस्य सहयोगितायां "वर्णोच्चारणप्रक्रिया " इति विषयमङ्गीकृत्य एकदिवसीयं व्याख्यानं समायोजितम्।

व्याख्यानं प्राददुः काशी-हिन्दू-विश्वविद्यालयस्य व्याकरण-विभागस्य भूतपूर्वविभागाध्यक्षा आचार्य-भगवतशरण-शुक्लमहोदयाः। स्वस्य व्याख्याने शुक्लमहोदयैः वर्णोच्चारणे सम्भाविताः त्रुटयो विशद्रूपेण बोधिताः। व्याख्याने छात्राणां जिज्ञासामपि शमनमकुर्वन् शुक्लवर्याः। प्रारम्भे दीपं प्रज्ज्वाल्य वैदिकं मङ्गलमाचरितम्। तदनन्तरम् उद्घाटनभाषणे विश्व-विद्यालयस्य कुलपतयः आचार्याः प्रह्लाद रा. जोशिवर्याः साम्प्रतिके काले उच्चारणदोषमधीकृत्य आयोजितस्य व्याख्यानस्य प्रसङ्गाम-कुर्वन्। समागतानाम् अतिथीनाम् समेषां वाक्कुसुमैः स्वागतम-करोत् व्याकरणविभागस्य अध्यक्षः अथ च आन्तरिक-गुणवत्ताश्वासन-केन्द्रस्य निदेशकश्च डॉ. चिरञ्जीवी अधिकारी-महोदयः। अवसरेऽस्मिन् विश्वविद्यालस्य कुलसचिवैः डॉ. विकाश-भार्गवशर्म-महोदयैः, परीक्षानियन्त्रकैः डॉ. रणजीत-कुमार-तिवारीमहोदयैः अपि व्याख्यानस्य प्रासङ्गिकत्वं प्रतिपादितम्। कार्यक्रमस्य सुसञ्चालनं धन्यवादज्ञापन-ञ्चाकरोत् न्यायविभागस्य व्याकरण-विभागस्य अध्यक्षः डॉ. राजीवलोचन-शर्ममहोदयः।

व्याख्याने संस्कृतसाहित्यविभागीयाः संस्कृत-वेदाध्ययनविभागीयाः सर्वदर्शन-विभागीयाः न्यायविभागीयाः राजनीति-विज्ञानविभागीया असमीया-विभागीयाश्च आचार्याः समुपस्थिताः आसन्। कार्यक्रमे शताधिकाः छात्राः भागं गृहीतवन्तः।

दैनिकं ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

3

13.05.2024 सोमवा

Website- www.hi

# कुमारभास्करवर्म-संस्कृतपुरातन-अध्ययनविश्वविद्यालये व्याख्यानकार्यक्रमः




**हिमसंस्कृतवार्ताः- नारायण अधिकारी, असम।**

अक्षयतृतीयेति पुण्यतिथौ तदनुसारं 10.05.2024 दिनाङ्के असमप्रदेशस्य नलबारीस्थित- कुमारभास्करवर्म- संस्कृतपुरातन- अध्ययनविश्वविद्यालयस्य व्याकरणविभागेन न्यायविभागस्य सहयोगितायां "वर्णोच्चारणप्रक्रिया" इति विषयमङ्गीकृत्य एकदिवसीयं व्याख्यानं समायोजितम्। व्याख्यानं प्राददुः काशीहिन्दूविश्वविद्यालयस्य व्याकरणविभागस्य भूतपूर्वविभागाध्यक्षा आचार्य-भगवतशरणशुक्लमहोदयाः। स्वस्य व्याख्याने शुक्लमहोदयैः वर्णोच्चारणे सम्भाविताः त्रुटयो विशद्रूपेण बोधिताः। व्याख्याने छात्राणां जिज्ञासामपि शमनमकुर्वन् शुक्लवर्याः। प्रारम्भे दीपं प्रज्वाल्य वैदिकं मङ्गलमाचरितम्। तदनन्तरम् उद्घाटनभाषणे विश्वविद्यालयस्य कुलपतयः आचार्याः प्रह्लाद रा. जोशिवर्याः साम्प्रतिके काले उच्चारणदोषमधीकृत्य आयोजितस्य व्याख्यानस्य प्रशंसामकुर्वन्। समागतानाम् अतिथीनां समेषां वाक्कुसुमैः स्वागतमकरोत् व्याकरणविभागस्य अध्यक्षः अथ च आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य निदेशकश्च डॉ. चिरञ्जीवी अधिकारीमहोदयः। अवसरेऽस्मिन् विश्वविद्यालस्य कुलसचिवैः डॉ. विकाशभार्गवशर्ममहोदयैः, परीक्षानियन्त्रकैः डॉ. रणजीतकुमारतिवारीमहोदयैः अपि व्याख्यानस्य प्रासङ्गिकत्वं प्रतिपादितम्। कार्यक्रमस्य सुसञ्चालनं धन्यवादज्ञापनञ्चाकरोत् न्यायविभागस्य अध्यक्षः डॉ. राजीवलोचनशर्ममहोदयः। व्याख्याने संस्कृतसाहित्यविभागीयाः संस्कृतवेदाध्ययनविभागीयाः सर्वदर्शनविभागीयाः न्यायविभागीयाः राजनीतिविज्ञानविभागीया असमीयाविभागीयाश्च आचार्याः समुपस्थिताः आसन्। कार्यक्रमे शताधिकाः छात्राः भागं गृहीतवन्तः।